# E-CONTENT

Prepared by


## MRS. CHAITALI DUTTA PANJA

**State Aided College Teacher**
**Department of Sanskrit**

## BARJORA COLLEGE

**NAAC ACCREDITED 'B'**
**Affiliated to the Bankura University**
**Barjora, Bankura, West Bengal, Pin-722202**
**Estd. – 1985**


## E-CONTENT FOR

**Semester:** 5th Semester

**Students:** Sanskrit Honours

**Course Code:** AHSNS 503DSE-1

**Course Title:** Kavya- Sahityadarpana: 1-2 Chapters

## TOPIC OF THE E-CONTENT

**॥ साहित्यदर्पणग्रन्थानुसारं काव्यस्य प्रयोजनम् ॥**

**(Sahityadarpangranthanusaram Kavyasya Prayojanam)**

# ॥ साहित्यदर्पणग्रन्थानुसारं काव्यस्य प्रयोजनम् ॥

भूमिका- मङ्गलाचरणान्तरं ग्रन्थरचनायाः प्रयोजनम् अवश्यमेव वक्तव्यम् । कस्यचिद् ग्रन्थस्य प्रारम्भे श्रोतृप्रवृत्तये अनुबन्धचतुष्टयं कथनीयम् । अधिकारि-सम्बन्ध-प्रयोजन-विषयाः चेति अनुबन्धचतुष्टयाः ।

प्रयोजनस्य ज्ञानं विना ग्रन्थस्य पठने श्रवणे वा कस्यापि प्रवृत्तिः न भवति एव । प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते इति वचनपि प्राप्यते । अत एव आचार्यविश्वनाथप्रणीतस्य साहित्यदर्पणग्रन्थस्य पठने को लाभ इति प्रश्नः उदेति । अस्य उत्तरं प्रदातुं विश्वनाथकविराजः काव्यप्रयोजनप्रतिपादनस्य कारणं प्रदर्शयितुम् उक्तम्-

'अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति काव्यफलान्याह' इति । अनेन वचनेन साहित्यदर्पणग्रन्थः काव्यस्य अङ्गं वर्तते, काव्यं चाङ्गि प्रधानं वा भवति ।

तत्र काव्यस्य किं प्रयोजनं भवति इति जिज्ञासायां साहित्यदर्पणग्रन्थे विश्वनाथेन एका कारिका निगदिता-

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।

काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते" ।। इति ।

अल्पधियाम् अल्पा परिश्रमभीरुत्वेन सुकुमारा धीः मतिः येषां तेषां राजकुमारादीनाम् अपिना परिणतबुद्धीनां विदुषाम् अपि, सुखात् एव आनन्देन एव, चतुर्वर्गफलप्राप्तिः चतुर्णां धर्म-अर्थ-काम-मोक्षाणां मानवजन्मनः प्रधानलक्ष्यभूतानां प्राप्तिः लाभः, काव्यात् रसात्मकवाक्यात् एव, यतः यस्मात् कारणात् भवति तस्मात्, तत्स्वरूपम् तस्य काव्यस्य स्वरूपं लक्षणम्, निरूप्यते शब्दप्रयोगेण ज्ञाप्यते इति श्लोकार्थः ।

अत्र पुरुषार्थशब्देन मानवजीवनस्य लक्ष्यभूतानि चत्वारि तत्त्वानि बोध्यन्ते- धर्मः, अर्थः, कामः, मोक्षश्चेति । एते चत्वारः पुरुषार्थाः काव्याचरणेन अपि लभ्यन्ते । इदानीं काव्यात् केन प्रकारेण एते लभ्याः इति आलोच्यन्ते-

धर्मलाभः- सत्काव्येन कृत्यज्ञानस्य अकृत्यज्ञानस्य लाभः भवति । रामयुधिष्ठिरादिवत् सत्ववचनादि कृत्यं कर्म कर्तव्यम्, रावणदुर्योधनादिवत् परस्त्रीहरणादि अकृत्यं कर्म कदापि न कर्तव्यम् इति ज्ञानं रामायणमहाभारतादिग्रन्थेभ्यः प्राप्यते । धर्मीयग्रन्थपठनेन साक्षादेव धर्मलाभः भवति । तदुक्तं साहित्यदर्पणे- काव्याद् धर्मप्राप्तिः भगवन्नारायणचरणारविन्दस्तवादिना इति ।

अर्थलाभः- काव्याद् अर्थलाभः भवति । बाणभट्टादयः प्रभृतयः कवयः कादम्बरादिकाव्यनिर्माणैः भूरिशः सम्पत्तिं लब्धवन्तः । धावकनामधेयः कविः रत्नावलीं नाटिकां विरच्य राज्ञे हर्षवर्धनाय दत्तवान् ततश्च प्रचुरं धनं लब्धवान् ।

कामलाभः- सम्यग्-काव्यविरचनेन कामलाभः सम्भवति । अत्र कामशब्देन कामनारूपः अर्थः ग्रहणीयः । काव्यरचनेन अर्थागमः भवेत्, तेन अर्थेन इच्छा पूर्णा भवति । काव्यात् प्राप्ता कामना धर्मयुक्ता अधर्मवर्जिता च भवति ।

मोक्षलाभः- काव्यात् मोक्षलाभः अपि भवति । निष्कामकर्माचरणेन मोक्षलाभः सम्भवति । साहित्यदर्पणे उक्तम्- मोक्षप्राप्तिश्च एतज्जन्यधर्मफलानुसन्धानात् इति ।

एते चतुर्वर्गफलप्राप्तिः वेदादिशास्त्राध्ययनेन अपि सम्भवति किन्तु सः उपायः न अनायाससाध्यः । काव्येन परमशान्तिः प्राप्यते । चतुर्वर्गफलप्राप्तिरपि भवति । तथाहि उक्तं भामहाचार्येण-

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥ इति शिवम् ।